संस्कृत-पाठ-माला।

(संस्कृत-भाषाका अध्ययन करनेका सुगम उपाय)

भाग ५ वाँ।

लेखक
पं. श्रीपाद दामोदर सातवळेकर,
स्वाध्याय-मंडल, किल्ला पारडी, (जि० सूरत)

प्रथम वार

संवत् २००९ शक १८७४ सन् १९५२

मूल्य ८ आने।

ध्यान दीजिये ।

इस पुस्तकमें पदच्छेदपूर्वक संस्कृतके पाठ प्रथम दिये हैं और पश्चात् उसीका संधिके साथ सरल संस्कृत दिया है।

दोनोंकी तुलना करके पाठक यदि अभ्यास करेंगे, तो उनको अतिसुगमतासे संधि विषयका ज्ञान हो सकता है।

इसमें जो संस्कृत वाक्य दिये हैं, फुरसतके समय उनका वारंवार पाठ करनेसे बहुतही लाभ हो सकता है।

इसमें जो श्लोक दिये हैं उनका भी पाठ अनेक वार करनेसे संस्कृत-भाषामें प्रवेश होनेमें सुगमता हो सकती है।

स्वाध्याय-मण्डल
'आनन्दाश्रम'
पारडी (जि० सूरत)

लेखक
पं. श्रीपाद दामोदर सातवळेकर
अध्यक्ष—स्वाध्याय-मण्डल

मुद्रक और प्रकाशक- व० श्री० सातवळेकर, बी ए.
भारत-मुद्रणालय, पारडी (जि. सूरत)

ॐ

संस्कृत-पाठ-माला।

पंचम भाग।

पाठ १

हे अर्जुन! त्वं स्वधर्मं अवेक्ष्य विकंपितुं न अर्हसि। हे पार्थ! त्वं क्षत्रियः असि। तव क्षत्रियस्य धर्मः एव युद्धं कर्तव्यम्। अतः त्वं स्वधर्मं क्षात्रधर्मं च अवेक्ष्य एवं विकंपितुं न योग्यः।

क्षत्रियस्य श्रेयः धर्म्यात् युद्धात् अन्यत् किं अपि न वर्तते। यदा क्षत्रियः धर्म्यं युद्धं करोति तदा एव सः श्रेयः प्राप्नोति। यदि सः एव क्षत्रियः युद्धात् पलायनं करिष्यति, तर्हि सः श्रेयः नैव प्राप्स्यति।

युद्धं स्वर्गस्य द्वारं एव अस्ति। यः क्षत्रियः धर्म्यं युद्धं करोति, स तेन एव द्वारेण स्वर्गं गच्छति। यदि स युद्धे मृतः भवति तर्हि स स्वर्गं गच्छति, यदि न मृतः, विजयं प्राप्तः, तर्हि राज्यं प्राप्नोति।

अतः क्षत्रियः ईदृशं युद्धं सुखेन करोति। तेन

स्वर्गं भूमिराज्यं वा प्राप्नोति। परंतु यः भीरुः पुरुषः युद्धं कर्तुं न समर्थः, सः न स्वर्गं प्राप्नोति। न अपि अत्र भूमिराज्यं प्राप्नोति।

हे अर्जुन ! यदि त्वं धर्म्यं युद्धं न करिष्यसि तर्हि स्वधर्मं हित्वा, कीर्तिं च हित्वा पापं एव अवाप्स्यसि। *यदा क्षत्रियः धर्म्यं अपि युद्धं न एव करोति,* तदा सः पापयुक्तः भवति।

प्रभविष्णुः क्षत्रियः सदा युद्धाय सिद्धः भवति। भो शिष्य ! किं क्षत्रियः एव युद्धं करोति? न अन्यः कः अपि युद्धं करोति?

क्षत्रियः शस्त्रेण युद्धं करोति तथा ब्राह्मणः अपि शब्देन युद्धं करोति, तत् ब्राह्मणस्य युद्धं वाग्युद्धं इति उच्यते।

वैश्यः अपि वाणिज्ययुद्धं करोति। शूद्रः अपि स्वकर्तव्येन युद्धं करोति एव। सर्वः अपि जनः एवं युद्धं करोति। युद्धेन विना जीवनं अपि न भवति। यः युद्धं न करोति तस्य अकीर्तिः भवति।

संभावितस्य अकीर्तिः मरणात् अपि अतिरिच्यते। यदा क्षत्रियः भयात् रणात् उपरतः भवति, तदा तस्य सर्वत्र अकीर्तिः एव भवति।

पाठ २

यः क्षत्रियः धर्मेण राज्यं रक्षति, राज्यस्य रक्षणार्थं च धर्म्यं युद्धं करोति, स एव क्षत्रियः यशस्वी कीर्तियुक्तः च भवति। न अन्यः। उदधेः जलं स्नानाय योग्यं भवति। उदधेः जलस्य स्नानेन शरीरस्य आरोग्यं भवति। तेन स्नानेन शरीरस्य रोगः अपि दूरं गच्छति।

एकः रथः भूमिमार्गेण गच्छति सः रथः इति उच्यते। अन्यः रथः जलमार्गेण गच्छति स जलरथः इति उच्यते। तृतीयः रथः आकाशमार्गेण गच्छति स विमानः इति उच्यते। भूपतिः प्रजापालनेन यशं इच्छति। ब्राह्मणः ज्ञानवर्धनेन श्रेयः वाञ्छति। वैश्यः धनवर्धनेन ऐश्वर्यं कांक्षति। शूद्रः कर्मणा उत्कर्षं प्राप्नोति। सर्वः अपि जनः स्वकर्मणा एव यशस्वी भवति। न तु उद्योगं त्यक्त्वा सिद्धिं कः अपि प्राप्नोति। ईश्वरः हृदयदेशे तिष्ठति। तं यदि त्वं शरणं गच्छसि तर्हि सः एव त्वां स्वर्गं नेष्यति।

यथा दिनसमये भानोः प्रकाशः भवति तथा रात्रिसमये सोमस्य प्रकाशः भवति। सूर्यस्य उष्णः प्रकाशः तथा सोमस्य शीतः प्रकाशः अस्ति।

स्वस्य धर्मः स्वधर्मः। स्वस्य यः धर्मः अस्ति सः

एव तस्य स्वधर्मः भवति । ज्ञानार्जनं ब्राह्मणस्य स्वधर्मः । प्रजापालनं क्षत्रियस्य स्वधर्मः । वाणिज्यं गोपालनं च वैश्यस्य स्वधर्मः । शूद्रस्य अपि सेवाकर्म एव स्वधर्मः अस्ति । यः स्वधर्मं पालयति सः एव उत्कर्षं प्राप्नोति न अन्यः । तस्य एव सर्वत्र कीर्तिः भवति न अन्यस्य । सः एव उत्तमं यशः प्राप्नोति न अन्यः ।

संधि किये हुए वाक्य ।

हे अर्जुन ! त्वं स्वधर्ममवेक्ष्य विकंपितुं नार्हसि । हे पार्थ ! त्वं क्षत्रियोऽसि । तव क्षत्रियस्य धर्म एव युद्धं कर्तव्यम् । अतस्त्वं स्वधर्मं क्षात्रधर्मं चावेक्ष्यैवं कंपितुं न योग्यः ।

क्षत्रियस्य श्रेयो धर्म्याद्युद्धादन्यत्किमपि न वर्तते । यदा क्षत्रियो धर्म्यं युद्धं करोति तदैव स श्रेयः प्राप्नोति । यदि स एव क्षत्रियो युद्धात्पलायनं करिष्यति तर्हि स श्रेयो नैव प्राप्स्यति ।

युद्धं स्वर्गस्य द्वारमेवास्ति । यः क्षत्रियो धर्म्यं युद्धं करोति स तेनैव द्वारेण स्वर्गं गच्छति । यदि स युद्धे मृतो भवति तर्हि स स्वर्गं गच्छति, यदि न मृतो, विजयं प्राप्तस्तर्हि राज्यं प्राप्नोति ।

पाठ ३

इस पाठमें निम्नलिखित श्लोक पढिये—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥

(भ० गीता. ३।२१)

पदानि-यत्। यत्। आचरति। श्रेष्ठः। तत्। तत्।एव। इतरः। जनः। सः। यत्। प्रमाणं। कुरुते। लोकः। तत्। अनुवर्तते।

अन्वयः-श्रेष्ठः यत् यत् आचरति, तत् तत् इतरः जनः। सः यत् प्रमाणं कुरुते, लोकः तत् अनुवर्तते॥

अर्थ-श्रेष्ठ मनुष्य जैसा जैसा आचरण करता है वैसा वैसा इतर मनुष्य [करता है,] वह जो जो प्रमाण (कुरुते) करता अर्थात् मानता है, लोक वैसाही अनुकरण करते हैं।

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः॥

(भ० गीता ६।५)

पदानि– उद्धरेत्। आत्मना। आत्मान। न। आत्मान। अवसादयेत्। आत्मा। एव। हि। आत्मनः। बधुः। आत्मा। एव। रिपुः। आत्मनः॥

अन्वयः-आत्मना आत्मानं उद्धरेत्। आत्मानं न अवसादयेत्। आत्मा एव हिआत्मनः बंधुःआत्मा एव आत्मनः रिपुः

अर्थ-(आत्मना) आप (आत्मानं) अपना उद्धार करें। अपनेको न गिरावे। क्योंकि आप ही अपना बंधु और आप ही अपना (रिपुः) शत्रु हैं।

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥
(भ० गीता ६।५)

पदानि-अ+संशयं। महा+बाहो। मनः। दुर्निग्रहं। चलम्। अभ्यासेन। तु। कौन्तेय। वैराग्येण। च। गृह्यते ॥

अन्वयः—हे महाबाहो ! मनः असंशयं दुर्निग्रहं चलम्। हे कौन्तेय ! अभ्यासेन वैराग्येण च गृह्यते ॥

अर्थ-हे (महाबाहो) बडे बाहुवाले वीर ! मन निःसंदेह (दु+निग्रहं) निग्रह करनेके लिये कठिन और (चलं) चंचल है। हे (कौन्तेय) कुंतीके पुत्र ! उसका (अभ्यासेन) प्रयत्न और वैराग्यसे (गृह्यते) निग्रह किया जाता है।

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु वीराः ॥
(भ० गीता ११।३२)

पदानि-कालः। अस्मि। लोक+क्षय+कृत्। प्र+वृद्धः। लोकान्।

सं-आहर्तुं । इह । प्रवृत्तः । ऋते । अपि । त्वां । न । भविष्य-न्ति । सर्वे । ये । अवस्थिताः । प्रत्यनीकेषु । वीराः ॥

अन्वयः-लोकक्षयकृत् प्रवृद्धः कालः अस्मि । इह लोकान् समाहर्तुं प्रवृत्तः । त्वां ऋते अपि सर्वे न भविष्यन्ति । ये वीराः प्रत्यनीकेषु अवस्थिताः ॥

अर्थ-मैं लोगोंका क्षय करनेवाला (प्रवृत्तः) बढ़ा हुआ (अस्मि) हूं । (इह) यहां लोकोंका (समाहर्तुं) संहार करनेके लिये प्रवृत्त [हुआ हूं !] (त्वां ऋते) तेरे विना भी ये सब नहीं रहेंगे, (ये) जो वीर (प्रत्यनीकेषु) शत्रुओंकी सेनाओंमें (अवस्थिताः) खडे रहे हैं ।

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥

पदानि-तस्मात् । त्वं । उत्तिष्ठ । यशः । लभस्व । जित्वा । शत्रून् । भुंक्ष्व । राज्यं । समृद्धं । मया । एव । एते । निहताः । पूर्वं । एव । निमित्त+मात्रं । भव । सव्य +साचिन् ॥

अन्वयः-हे सव्यसाचिन् ! तस्मात् त्वं उत्तिष्ठ, यशः लभस्व, शत्रून् जित्वा समृद्धं राज्यं भुंक्ष्व । एते मया पूर्वं एव निहताः । त्वं निमित्तमात्रं भव ॥

अर्थ-हे (सव्यसाचिन्) अर्जुन ! इसलिये तू उठ, यश

(लभस्व) लाभ कर, शत्रुओंको जीत करके समृद्ध राज्यका (भुंक्ष्व) उपभोग कर। (एते) ये मैंने पहिले ही (निहताः) मारे गये हैं। तू निमित्तके लिये (भव) हो॥

इस पाठमें जो श्लोक दिये हैं उनका अभ्यास करनेके पश्चात् प्रत्येक श्लोकके पद, अन्वय और अर्थ मनसेही कीजिये। और जो अशुद्धि प्रतीत होगी उसे ठीक कीजिये। कागजपर लिखने की आवश्यकता नहीं है। श्लोक देखकर यह कार्य मनसेभी किया जा सकता है, और जो अभ्यास इस प्रकार होगा वही विशेष उपयोगी होगा। यदि आप इस रीतिसे अभ्यास करेंगे तो आपकी प्रगति संस्कृतमें निःसंदेह शीघ्रही होगा।

संधि किये हुए वाक्य।

अतः क्षत्रियः ईदृशं युद्धं सुखेन करोति। तेन स्वर्गं भूमिराज्यं वा प्राप्नोति। परंतु यो भीरुः पुरुषो युद्धं कर्तुं न समर्थः सः न स्वर्गं प्राप्नोति। नाप्यत्र भूमिराज्यं प्राप्नोति।

हे अर्जुन! यदि त्वं धर्म्यं युद्धं न करिष्यसि, तर्हि स्वधर्मं हित्वा, कीर्तिं च हित्वा पापमेवावाप्स्यसि। यदा क्षत्रियो धर्म्यमपि युद्धं नैव करोति, तदा स पापयुक्तो भवति।

प्रभविष्णुः क्षत्रियः सदा युद्धाय सिद्धो भवति। भो शिष्य! किं क्षत्रिय एव युद्धं करोति? \

पाठ ४

श्रेष्ठः उत्तमः मनुष्यः यत् यत् आचरति तत् तत् एव इतरः जनः आचरति। यत् यत् एव नृपः आचरति तत् तत् एव प्रजाजनः आचरति। विद्वान् आचरति तथा एव साधारणः जनः आचरति। यथा त्वं आचरसि तथा एव अहं आचरामि। यथा अहं आचरामि तथा त्वं न आचरसि।

सः श्रेष्ठः उत्तमः पुरुषः यत् यत् प्रमाणं कुरुते तत् तत् एव लोकः अनुवर्तते। यत् यत् भूपतिः प्रमाणं कुरुते तत् तत् एव प्रजाजनः अनुवर्तते। विद्वान् यत् यत् प्रमाणं कुरुते साधारणः जनः तत् तत् एव अनुवर्तते।

आत्मना आत्मानं उद्धरेत् सदा आत्मानं एवं आत्मना उद्धरेत् कदा अपि आत्मना आत्मानं न अवसादयेत्। मनुष्येन सदा तथा प्रयत्नः कर्तव्यः येन तस्य उद्धारः भविष्यति।

आत्मा एव आत्मनः बंधुः भवति तथा आत्मनः शत्रुः अपि आत्मा एव भवति। यः स्वकर्तव्यं करोति सः एव आत्मनः बंधुः तथा यः स्वकर्तव्यं न करोति स एव आत्मनः शत्रुः भवति।

हे मनुष्य! मनः दुर्निग्रहं चलं च आस्ति इति असंशयं सत्यं एव अस्ति। परंतु तस्य निग्रहः अभ्यासेन वैराग्येण च भवति न अन्येन केन अपि कर्मणा भवति।

अहं लोकस्य क्षयकृत् कालः अस्मि। लोकान् समाहर्तुं इह अस्मिन् युद्धे प्रवृत्तः अस्मि। युद्धे सर्वस्य लोकस्य क्षयं कर्तुं इच्छामि। ये वीराः अस्मिन् युद्धे अत्र अवस्थिताःते सर्वे त्वां ऋते अपि न भाविष्यन्ति एव।

यः वीरः इदानीं युद्धे अवस्थितः स विजयं प्राप्स्यति। यः धीरः पुरुषः युद्धं करोति सः अवश्यं विजयं प्राप्नोति।

तस्मात् त्वं उत्तिष्ठ। हे वीर! इदानीं त्वं युद्धाय, उत्तिष्ठ, यशः च लभस्व। शत्रून् जित्वा समृद्धं राज्यं भुंक्ष्व।

एते वीरा मया एव पूर्वं निहताः। अतः त्वं निमित्तमात्रं भव।

क्षत्रस्य धर्मस्य तत्त्वं धर्म्यं युद्धं कर्तव्यं इति एव अस्ति। अतः धर्म्यात् युद्धात् पलायनं क्षत्रियाय नः योग्यं भवति।

तस्य क्षत्रियस्य किं नगरं अस्ति? सः वीर-

क्षत्रियः वीरपुरे नगरे निवसति। तस्मात् नगरात् सः इदानीं एव अत्र आगतः। सः किमर्थं अत्र आगतः? स कदा अस्मात् नगरात् स्वनगरं गमिष्यति इति त्वं जानासि किम्?

आदौ वीरेण इंद्रियाणि संयम्य शत्रुणा सह अवश्यं युद्धं कर्तव्यम्। यः वीरः निर्मलः निश्चलः निर्विकारः नित्यपूतः निस्पृहः निर्मोहः सः एव प्रशंसनीयः। स एव युद्धे विजयं प्राप्नोति।

सूचना—यदि पाठक ये वाक्य सुगमतासे समझ जायगे तो ठीक ही है। परंतु यदि ये वाक्य उनके समझमें न आये, तो उनको पूर्वभाग अर्थात् चतुर्थ पुस्तक पुनः देखनी चाहिये।

पाठक स्वयं अनुभव करेंगेही कि जो पढनेवाले इस पद्धतिसे नियमपूर्वक अभ्यास कर रहे हैं उनकी उन्नति कितनी हो रही है। अल्पपरिश्रमसे उनको संस्कृतका कितना अधिक ज्ञान हो रहा है। अब पाठक बहुतसे वाक्य बोल सकते हैं, बहुतसे वाक्य लिख सकते हैं तथा सुगम श्लोक भी समझ सकते हैं।

पाठकोंको एक सूचना करनी चाहिये। वह यह है कि वे पहिला पाठ कच्चा रखकर आगे बढनेका प्रयत्न न करें, देर लगी तो भी पर्वाह नहीं है, परंतु पहिले पाठ पके करके ही आगे बढनेका यत्न करें।

पाठ ५

दुष्यन्तस्तु ततो राजा पुत्रं शाकुंतलं तदा ।
भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत ॥
(म. भा. आदि. ७४।१२९)

अन्वयः—ततः दुष्यन्तः राजा तु तदा शाकुंतलं पुत्रं नामतः भरतं कृत्वा यौवराज्ये अभ्यषेचयत् ॥

अर्थः- पश्चात् दुष्यन्त राजाने तो तब (शाकुंतलं) शकुंतलाके पुत्रको नामसे भरत करके यौवराज्यमें अभिषेक किया।

तस्य तत्प्रथितं चक्रं प्रावर्तत महात्मनः ।
भास्वरं दिव्यमजितं लोकसंनादनं महत् ॥१३०॥

अन्वयः- तस्य महात्मनः महत् लोकसंनादनं अजितं दिव्यं भास्वरं प्रथितं चक्रं प्रावर्तत ॥

अर्थ-उस महात्माका बड़ा लोकोंमें प्रख्यात अजेय दिव्य तेजस्वी प्रख्यात चक्र प्रवर्तित हुआ।

स विजित्य महीपालांश्चकार वशवर्तिनः ।
चचार च सतां धर्मं प्राप चानुत्तमं यशः ॥१३१॥

अन्वयः- स महीपालान् विजित्य, वशवर्तिनः चकार। सतां धर्मं च चकार। अनुत्तमं यशः च प्राप ॥

अर्थ--उसने महीपालोंको जीतकर, वशमें (चकार) कर लिया। सज्जनोंके धर्मका आचरण किया और (अनुत्तमं)

अर्थात् उत्तम यज्ञ (प्राप) प्राप्त किया ।

स राजा चक्रवर्त्यासीत्सार्वभौमः प्रतापवान् ।
ईजे च बहुभिर्यज्ञैर्यथा शक्रो मरुत्पतिः ॥ १३२ ॥

पदानि-- सः । राजा । चक्रवर्ती । आसीत् । सार्वभौमः । प्रतापवान् । ईजे । च । बहुभिः । यज्ञैः । यथा । शक्रः । मरुत्+पतिः ॥

अन्वयः-सः राजा प्रतापवान सार्वभौमः चक्रवर्ती आसीत् । यथा मरुत्पतिः शक्रः [तथा सः] बहुभिः यज्ञैः ईजे ॥

अर्थ--वह राजा प्रतापी सार्वभौम और चक्रवर्ती था । जैसा मरुतोंका राजा (शक्र) इंद्र उस प्रकार बहुत यज्ञोंसे (ईजे) यज्ञ करता रहा ।

याजयामास तं कण्वो विधिवद्भूरिदक्षिणम् ।
श्रीमान्गोविततं नाम वाजिमेधमवाप सः ॥१३३॥

अन्वयः-तं कण्वः विधिवत् याजयामास । भूरि+दक्षिणं गोविततं नाम वाजिमेधं सः श्रीमान् अवाप ॥

अर्थ--उनसे कण्वने विधियुक्त यज्ञ कराया । बहुत दाक्षिणावाले गोवितत नामक अश्वमेधको उस श्रीमानने (अवाप) प्राप्त किया अर्थात् यज्ञ किया ।

यस्मिन्सहस्रं पद्मानां कण्वाय भरतो ददौ ।
भरताद्भारती कीर्तिर्येनेदं भारतं कुलम् ॥ १३४ ॥

अन्वयः--यस्मिन् भरतः पद्मानां सहस्रं कण्वाय ददौ ।

भरतात् भारती कीर्तिः, येन इदं भारतं कुलम्।

अर्थ--जिसमें भरतने सहस्र पद्म कण्वको दान दिये।
भरतसे भारतकी कीर्ति हुई, जिससे यह भारत कुल हुआ॥

अपरे ये च पूर्वे वै भारता इति विश्रुताः।
भरतस्यान्ववायेहि देवकल्पा महौजसः॥ १३५॥

अन्वयः-- भरतस्य अन्ववाये हि महौजसः देवकल्पाः अपरे ये च पूर्वे वै भारताः इति विश्रुताः।

अर्थ-- भरतके (अन्ववाये) गोत्रमें ही महातेजस्वी देवों के समान पहिले और पूर्वके सब भारत (इति) इस नामसे (विश्रुताः) प्रसिद्ध हुए हैं॥

बभूवुर्ब्रह्मकल्पाश्च बहवो राजसत्तमाः।
येषामपरिमेयानि नामधेयानि सर्वशः॥ १३६॥

अन्वयः--बहवः राजसत्तमाः ब्रह्मकल्पाः बभूवुः येषां सर्वशः नामधेयानि अपरिमेयानि॥

अर्थ--बहुत राजश्रेष्ठ पुरुष (ब्रह्मकल्पाः) ब्राह्मण जैसे (बभूवुः) हुए जिनके सर्वोंके नाम अपरिमित हैं।

ततः स नृपशार्दूल पूरूं राज्येऽभिषिच्य च।
तपः सुचरितं कृत्वा भृगुतुंगे महातपाः॥ ९७॥

अन्वयः-- हे नृपशार्दूल! ततः पूरूं राज्ये अभिषिच्य सः महातपाः भृगुतुंगे सुचरितं तपः कृत्वा॥

अर्थ-हे नृपश्रेष्ठ ! पश्चात् पुरुको राज्यपर अभिषेक कर उस महातपस्वीने भृगुतुंग पर्वतपर उत्तम तप करके ॥

कालेन महता पश्चात्कालधर्ममुपेयिवान् ॥
कारयित्वा त्वनशनं सदारः स्वर्गमाप्तवान् ॥५०॥

अन्वयः—पश्चात् महता कालेन कालधर्मं उपेयिवान्। स-दारः तु अनशनं कारयित्वा स्वर्गं आप्तवान् ॥

अर्थ—पश्चात् बडे समयके नंतर (कालधर्मं) मृत्युको (उपेयिवान्) प्राप्त हुआ। (स-दारः) स्त्रीसहित (अनशनं) उपवासका व्रत करके स्वर्गको (आप्तवान्) प्राप्त हुआ।

पाठ समाप्तिके पश्चात् पाठक श्लोकोंको वारंवार पढें। स्मरण रखें कि श्लोकोंको वारंवार पढनेसे ही पाठकोंका प्रवेश संस्कृतमें अतिशीघ्र होगा। इसलिये इस विषयमें असावधानी होने न दें।

संधि किये हुए वाक्य।

श्रेष्ठ उत्तमो मनुष्यो यद्यदाचरति तत्तदेवेतरो जन आचरति। यद्यन्नृप आचरति तत्तदेव प्रजाजन आचरति। यथा विद्वानाचरति तथैव साधारणो जन आचरति। यथा त्वमाचरसि तथा एवाहमाचरामि। यथाऽहमाचरामि तथा त्वं नाचरसि।

पाठ ६

अब इस पाठमें पूर्ववत् पूर्वपाठोंके संस्कृत-वाक्योंके संधि बनाकर सरल संस्कृत लिखा जाता है। पाठक इसका अभ्यास वैसाही करें।

संस्कृत—वाचन—पाठः।

रामं रजोमेघेन सा ताटिका राक्षसी मुहूर्तं व्यमोहयत्। परंतु पश्चात्तां ताटिकां रामः शरेणोरसि विव्याध। तेन सा पपात ममार च।

ततस्ताटिकावधेन तुष्टो मुनिवरो विश्वामित्रो राममुवाच। हे राजपुत्र! सर्वथा परितुष्टोऽस्मि तेऽनेन शौर्येण। अतस्ते सर्वाण्यप्यस्त्राणि प्रीत्या प्रयच्छामि। तैरस्त्रैः समन्वितो युद्धे शत्रूञ्जेष्यसि। इत्युक्त्वा स विप्रो रामाय तानि सर्वाण्येवास्त्राणि न्यवेदयत्।

ततः स विश्वामित्रो रामं लक्ष्मणं च गृहीत्वा स्वकीयं सिद्धाश्रमं प्राविशत्।

तत्र मुहूर्तं विश्रान्तौ रामलक्ष्मणौ मुनिश्रेष्ठो यज्ञदीक्षां प्रविशत्विति तमनुप्रयन्नतुः। तच्छ्रुत्वा सर्वेऽपि मुनयो रामलक्ष्मणौ प्रशशंसुः।

अद्यप्रभृति षड्रात्रं रक्षतां युवामिति चोचुः। तावपि यत्तौ षड्रात्रं तपोवनमरक्षताम्।

षष्ठ्यां रात्रौ मायां कुर्वाणौ राक्षसावभ्यधावताम्। परमक्रुद्धो रामो मारीचस्य राक्षस्योरसि मानवमस्त्रं चिक्षेप।

तेनास्त्रेण मारीचः सागरे क्षिप्तः। मारिचं सागरे क्षिप्तं दृष्ट्वा सुबाहोरुरस्याग्नेयमस्त्रं चिक्षेप।

सोऽपि सुबाहुरस्त्रेण विद्धो भुवि प्रापतत्। रामोऽपि वायव्यास्त्रेण शेषान् राक्षसाञ्जघान।

एवं निर्विघ्नतया समाप्ते यज्ञे विश्वामित्रो दिशो राक्षसहीना दृष्ट्वा राममब्रवीत्।

कृतार्थोऽस्मि महाबाहो!

मिथिलोपवने तु तत्र निर्जनमाश्रमपदं दृष्ट्वा राघवः पप्रच्छ, कस्यायमाश्रमः ?

विश्वामित्र उवाच—अत्र पुराऽहल्यासहितो गौतमस्तप आतिष्ठत्। एष गौतमस्य महर्षे रम्य आश्रम इति।

पाठक इसका अभ्यास करें। इसमें कोई कठिनता हुई तो पूर्व पाठके वाक्य (भाग ४ में) देखकर उसकी निवृत्ति करें।

पाठ ७

अब पूर्वपाठके श्लोकोंका सरल संस्कृत नीचे दिया जाता है उसका भी उत्तम अभ्यास कीजिये—

ततो दुष्यन्तो राजा तु तदा शाकुन्तलं पुत्रं नामतो भरतं कृत्वा यौवराज्येऽभ्यषेचयत्।

तस्य महात्मनो महल्लोकसंनादनमाजितं दिव्यं भास्वरं प्रथितं चक्रं प्रावर्तत। स महीपालान्विजित्य वशवर्तिनश्चकार। सतां धर्मं च चचार। अनुत्तमं यशश्च प्राप। स राजा प्रतापवान्सार्वभौमश्चक्रवर्ती आसीत्। यथा मरुत्पतिः शक्रस्तथा स बहुभिर्यज्ञैश्चेजे।

तं कण्वो विधिवद्याजयामास। भूरिदक्षिणं गोवितंतं नाम वाजिमेधं स श्रीमानवाप। यस्मिन्भरतः पद्मानां सहस्रं कण्वाय ददौ। भरताद्भारती कीर्तिर्येनेदं भारतं कुलम्।

भरतस्यान्ववाये हि महौजसो देवकल्पा अपरे ये च पूर्वे ये भारता इति विश्रुताः। बहवो राजसत्तमा ब्रह्मकल्पा बभूवुः। येषां सर्वशो नामधेयानि अपरिमेयानि।

हे नृपशार्दूल! ततः पूरुं राज्येऽभिषिच्य स महातपाः भृगुतुंगे सुचरितं तपः कृत्वा, पश्चान्महता-

कालेन कालधर्ममुपेयिवान् ।

सदारस्त्वनशनं कारयित्वा स्वर्गमाप्तवान् ।

प्रश्नाः ।

१ ताटिका रामं कथं व्यमोहयत् ? २ पश्चाद्रामेण किं कृतम् ? ३ ताटिकावधेन कः तुष्टः ? ४ तुष्टेन विश्वामित्रेण रामाय किं दत्तम् ? ५ सिद्धाश्रमं गत्वा रामेण किं कृतम् ? ६ रामेण केन अस्त्रेण मारीचः हतः ? ७ रामः शेषान् राक्षसान् केन अस्त्रेण जघान ? ८ पश्चात् कस्याः आश्रमं रामः गतः ?

पाठक इन प्रश्नोंका उत्तर संस्कृतमेंही देनेका यत्न करें। पूर्व पाठ यदि ठीक हुआ होगा तो इन प्रश्नोंका उत्तर देना पाठकोंको कठिन नहीं प्रतीत होगा। इससे पाठकोंकी परीक्षा भी हो जायगी।

संधि किये हुए वाक्य ।

एते वीरा मयैव पूर्वं निहताः। अतस्त्वं निमित्तमात्रं भव। क्षत्रस्य धर्मस्य तत्त्वं धर्म्यं युद्धं कर्तव्यमित्येवास्ति। अतो धर्म्याद्युद्धात्पलायनं क्षत्रियाय न योग्यं भवति। तस्य क्षत्रियस्य किं नगरमस्ति ? स वीरः क्षत्रियो वीरपुरे निवसति। तस्मान्नगरात्स इदानीमेवात्रागतः। स किमर्थमत्रागतः ?

पाठ ८

संस्कृत-वाक्यानि ।

१ अत्र पुरा अहल्यासहितः महात्मा गौतमः ऋषिः तपः अतप्यत् । २ मुनिवेषधरः इन्द्रः गौतमस्य आश्रमं एकदा आजगाम । ३ तव संगं इच्छामि इति सः अहल्यां अब्रवीत् । ४ तस्मिन्काले गौतमः महामुनिः स्वकीयं आश्रमं प्रविवेश । ५ तदा इन्द्रः विषण्णवदनः च अभवत् । ६ तं तथा दृष्ट्वा मुनिः इन्द्रं शशाप । ७ भार्यां अपि ततो गौतमः शप्तवान् । ८ यदा रामः एतद्वनं आगमिष्यति तदा पूता भविष्यसि ।

भाषा—वाक्य

१ यहां पूर्वकालमें अहल्याके सहित महात्मा गौतम ऋषि तप तपता रहा । २ मुनिवेष धारण कर इन्द्र गौतमके आश्रमको एक समय आगया । ३ तेरे संगकी इच्छा करता हूं ऐसा वह अहल्यासे बोला । ४ उसी कालमें गौतम महामुनिने अपने आश्रममें प्रवेश किया । ५ तब इंद्र खिन्नवदन हुआ । ६ उसको वैसा देखकर मुनिने इंद्रको शाप दिया । ७ स्त्रीको भी पश्चात् गौतमने शाप दिया । ८ जब राम इस वनको आयेगा तब तू पवित्र होगी ।

संस्कृत-वाक्यानि ।

९ हे राम ! इमं आश्रमं देवरूपिणीं अहल्यां च अधुना तारय। १० इति एवं विश्वामित्रस्य ऋषेः वचनं श्रुत्वा सलक्ष्मणः रामः आश्रमं प्रविवेश। ११ तत्र तपस्विनीं दीप्तां अहल्यां रामः ददर्श । १२ रामस्य दर्शनेन सा अहल्या पूता भूत्वा पूर्ववत् रूपसंपन्ना बभूव। १३ रामस्य दर्शनात् एव शापस्य अन्तं गता सा अहल्या। १४ गौतमवचनं स्मरन्ती सा अहल्या रामलक्ष्मणयोः पाद्यं अर्घ्यं आतिथ्यं च चकार।

भाषा—वाक्य ।

९ हे राम ! इस आश्रमका तथा देवरूपिणी अहल्याका अब तारण कर। १० ऐसा यह विश्वामित्र ऋषिका वचन सुनकर लक्ष्मणसहित रामने आश्रममें प्रवेश किया। ११ वहां तपस्विनी तेजस्वी अहल्याको रामने देखा। १२ रामचंद्रके दर्शनसे वह अहल्या पवित्र होकर पूर्ववत् स्वरूपसे युक्त हो गई। १३ रामके दर्शनसेही शापके अंतको प्राप्त हुई वह अहल्या। १४ गौतम-मुनिका वचन स्मरण करती हुई वह अहल्या राम और लक्ष्मणको (पाद्यं) पांव धोनेके लिये जल (अर्घ्यं) पूजासाहित्य और (आतिथ्यं) आतिथि-सत्कार करने लगी।

पाठ ९

संस्कृत-वाक्यानि।

१५ रामलक्ष्मणौ अपि तपोबलविशुद्धायाः तस्याः अहल्यायाः पादौ जगृहतुः। १६ गौतमः अपि तदा तत्र आगत्य रामं विधिवत् संपूज्य पूर्ववत् तपः तेपे। १७ ततः रामः लक्ष्मणेन सह विश्वामित्रं पुरस्कृत्य उत्तरां दिशं प्रस्थितः। १८ मिथिलापतिः राजा जनकः तु तत् श्रुत्वा विनयेन सहसा प्रत्युज्जगाम। १९ तेन जनकेन दत्तं पूजार्घं प्रतिगृह्य विश्वामित्रः राज्ञः कुशलं यज्ञस्य च निर्विघ्नतां पप्रच्छ।

भाषा-वाक्य।

१५ राम और लक्ष्मणने भी तपके बलसे शुद्ध हुए उस अहल्याके पांव पकड लिये। १६ गौतम भी तब वहां आकर रामकी विधिवत् पूजा कर तप करने लगा। १७ तब राम लक्ष्मणके साथ विश्वामित्रको आगे रखकर उत्तर दिशाको चला। १८ मिथिलादेशका पालक राजा जनक यह श्रवण कर विनयसे तत्क्षणमेंही (प्रत्युज्जगाम) सन्मुख गया। १९ उस जनकने दिये पूजासाहित्यका स्वीकार कर विश्वामित्रने राजाका कुशल और यज्ञकी निर्विघ्नता पूछी।

संस्कृत-वाक्यानि ।

२० तत्सर्वं निवेद्य राजा अपि कृताञ्जलिः मुनिं पप्रच्छ कौ इमौ वीरौ पुत्रौ इति। २१ विश्वामित्रः अपि सर्वं पूर्वं वृत्तान्तं न्यवेदयत् । २२ ततः जनकः उवाच। धन्यः अनुगृहीतः च अस्मि ।

भाषा-वाक्य ।

२० वह सब निवेदन कर राजा भी (कृत-अञ्जलिः) हाथ जोडकर मुनिसे पूछने लगा कि कौन ये वीर पुत्र हैं ? २१ विश्वामित्रने सब पूर्ववृत्तान्त निवेदन किया । २२ तब जनक बोला कि मैं धन्य और अनुगृहीत हूं ।

पाठक ये वाक्य वारंवार पढकर अच्छी प्रकार तैयार करें और अभ्यास ऐसा करें कि इस पाठमें कोई कठिनता न रहे । सावधानीके साथ अच्छा अभ्यास करें । कमसे कम यह पाठ बीस वार पढें ।

संधि किये हुए वाक्य ।

तेन जनकेन दत्तं पूजार्घं प्रतिगृह्य विश्वामित्रो राज्ञः कुशलं यज्ञस्य च निर्विघ्नतां पप्रच्छ । तत्सर्वं निवेद्य राजापि कृताञ्जलिर्मुनिं पप्रच्छ काविमौ वीरौ पुत्राविति । विश्वामित्रोऽपि सर्वं पूर्वं वृत्तान्तं न्यवेदयत् । ततो जनक उवाच- धन्योऽनुगृहीतश्चास्मि ।

पाठ १०

(महाभारत आदि० १४९)

विदुरस्य सुहृत्काश्चित्खनकः कुशलो नरः।
विविक्ते पाण्डवान्राजन्निदं वचनमब्रवीत् ॥ १ ॥

अन्वयः -हे राजन्! कश्चित् नरः विदुरस्य सुहृत् कुशलः खनकः विविक्ते पाण्डवान् इदं वचनं अब्रवीत्॥

अर्थ—हे राजा! कोई एक मनुष्य विदुरका (सुहृत्) मित्र कुशल (खनकः) सुरंग खोदनेवाला (विविक्ते) एकान्तमें पाण्डवोंको यह वचन बोला।

प्रहितो विदुरेणास्मि खनकः कुशलो ह्यहम्।
पाण्डवानां प्रियं कार्यमिति किं करवाणि वः ॥२॥

अन्वयः—अहं कुशलः खनकः विदुरेण प्रहितः अस्मि। वः पाण्डवानां किं प्रियं कार्यं करवाणि इति।

अर्थ—मैं कुशल मिट्टी खोदनेवाला विदुरने भेजा हुआ हूं। (वः) आप पांडवोंका कौनसा प्रिय कार्य करूं?

प्रच्छन्नं विदुरेणोक्तः श्रेयस्त्वमिह पाण्डवान्।
प्रतिपादय विश्वासादिति किं करवाणि वः ॥ ३ ॥

अन्वयः—विदुरेण विश्वासात् प्रच्छन्नं उक्तः इह त्वं पाण्डवानां श्रेयःप्रतिपादय इति। वः किं करवाणि?

अर्थ—विदुरने विश्वासके कारण (प्रच्छन्नं) गुप्तभावसे

कहा कि, यहां तू पांडवोंका हित (प्रतिपादय) कर, सो आपका क्या कार्य (करवाणि) करूं ?

क्रृष्णपक्षे चतुर्दश्यां रात्रावस्यां पुरोचनः।
भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥ ४ ॥

अन्वयः–कृष्णपक्षे अस्या चतुर्दश्यां रात्रौ पुरोचनः तव भवनस्य द्वारि हुताशनं प्रदास्यति ॥

अर्थ–कृष्णपक्षमें इस चतुर्दशी रात्रीमें पुरोचन तेरे गृहके द्वारमें (हुताशनं) अग्नि देगा अर्थात् घर जला देगा ॥

मात्रा सह प्रदग्धव्याः पांडवाः पुरुषर्षभाः ।
इति व्यवसितं तस्य धार्तराष्ट्रस्य दुर्मतेः ॥ ५ ॥

अन्वयः—पुरुषर्षभाः पांडवाः मात्रा सह प्रदग्धव्याः इति तस्य दुर्मतेः धार्तराष्ट्रस्य व्यवसितम् ॥

अर्थ–(पुरुष–ऋषभाः) पुरुषश्रेष्ठ पांडव (मात्रा) माताके साथ (प्र–दग्धव्याः) जलाये जांय यह उस दुष्ट-बुद्धि (धार्तराष्ट्रस्य) धृतराष्ट्रपुत्रका (व्यवसित) निश्चित किया हुआ है।

किञ्चिच्च विदुरेणोक्तो म्लेच्छवाचासि पांडव ।
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणम् ॥ ६ ॥

अन्वयः–हे पांडव ! म्लेच्छवाचा विदुरेण किंचित् च उक्तः असि । तत् त्वया च तथा इति उक्तं एतत् विश्वासकारणम् ।

अर्थ-हे पांडव ! (म्लेच्छवाचा) म्लेच्छ भाषाद्वारा विदुरने तुझे (उक्तः) कहा हुआ है । वह तूने भी (तथा) ठीक है ऐसा कहा (एतत्) यह विश्वासका हेतु है । [अर्थात् इतना कहनेसे तेरा विश्वास मुझपर हो]

उवाच तं सत्यधृतिः कुंतीपुत्रो युधिष्ठिरः ।
अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ॥७॥

अन्वयः—सत्यधृतिः कुंतीपुत्रः युधिष्ठिरः तं उवाच । हे सौम्य ! त्वां विदुरस्य सुहृदं अभिजानामि ॥

अर्थ—(सत्यधृतिः) धैर्यवाला कुंतीपुत्र युधिष्ठिर उससे बोला । हे (सौम्य) प्रिय ! तुझे विदुरका मित्र जानता हूं ।

शुचिं प्राप्तं प्रियं चैव सदा च दृढभक्तिकम् ।
न विद्यते कवेः किञ्चिदविज्ञातं प्रयोजनम् ॥ ८ ॥

अन्वयः-शुचिं प्रियं सदा दृढभक्तिकं प्राप्तं [त्वां अभि जानामि] कवेः अविज्ञातं किञ्चित् प्रयोजनं न विद्यते ॥

अर्थ-शुद्ध प्रिय सदा दृढभक्ति धरनेवाला तू प्राप्त हुआ है ऐसा मैं जानता हूं । (कवेः) कवि विदुरको अज्ञात कोई कार्य नहीं है । [अर्थात् तुम जैसा करोगे वह उसको संमत होगा]

इस पाठके श्लोकोंमें आये हुए संधियोंका विवरण—

१ कुशलो नरः = कुशलः नरः ।
२ राजन्निदं = राजन् इदं ।

३ प्रहितो विदुरेणास्मि = प्रहितः विदुरेण अस्मि ।
४ कुशलो ह्यहं = कुशलः हि अहम् ।
५ विदुरेणोक्तः = विदुरेण उक्तः ।
६ श्रेयस्त्वम् = श्रेयः त्वम् ।
७ विश्वासादिति = विश्वासात् इति ।
८ किञ्चिच्च = किञ्चित् च ।
९ तत्तथेत्युक्तमेतद्विश्वासकारणं = तत् तथा इति उक्तं एतत् विश्वास- कारणम् ।

पाठक इन संधियोंको पूर्व श्लोकोंमें देखे और जान लें कि ये संधि कैसे बने हैं ।

संधि किये हुए वाक्य ।

अत्र पुराऽहल्यासहितो महात्मा गौतम ऋषिस्तपोऽतप्यत् । मुनिवेषधर इन्द्रो गौतमस्याश्रममेकदा जगाम । तव संगमिच्छामीति सोऽहल्यामब्रवीत् । तस्मिन्काले गौतमोमहामुनिस्स्वकीयमाश्रमं प्रविवेश । तदेन्द्रो विषण्णवदनश्चाभवत् । तं तथा दृष्ट्वा मुनिरिन्द्रं शशाप । भार्यामपि तथा गौतमः शप्तवान् । यदा राम एतद्वनमागमिष्यति तदा पूता भविष्यसि । हे राम ! इममाश्रमं देवरूपिणीमहल्याश्चाधुना तारय ।

पाठ ११

यदि आपने पूर्व दो पाठोंका अध्ययन ठीक प्रकार किया है तो निम्नलिखित वाक्य आपकी समझमें आ जायंगे।

संस्कृत—वाचन—पाठः।

पुराऽत्र महात्माऽहल्यासहितो गौतमऋषिस्तपोऽतप्यत्। इंद्रो मुनिवेषधरो गौतमस्याऽश्रममेकदाऽऽजगाम। तव संगमिच्छामीति सोऽहल्यामब्रवीत्। गौतमो महामुनिः स तस्मिन्काले प्रविवेश स्वकीयमाश्रमम्।

तदेन्द्रो विषण्णवदनश्चाभवत्। तथा तं दृष्ट्वा मुनिरिन्द्रं शशाप। ततो गौतमो भार्यामपि शप्तवान्। यदा राम एतद्वनमागमिष्यति पूता तदा भविष्यसि।

हे राम! इममाश्रमं देवरूपिणीमहल्यां चाधुना तारय। इत्येवं विश्वामित्रस्यर्षेर्वचनं श्रुत्वा सलक्ष्मणो राम आश्रमं प्रविवेश। तत्र तपस्विनीं दीप्तामहल्यां रामो ददर्श। रामस्य दर्शनेन साऽहल्या पूता भूत्वा पूर्ववद्रूपसंपन्ना बभूव। रामस्य दर्शनादेव शापस्यान्तं गता साऽहल्या।

गौतमवचनं स्मरन्ती साऽहल्या रामलक्ष्मणयोः पाद्यमर्घ्यमातिथ्यं च चकार।

रामलक्ष्मणावपि तपोबलविशुद्धायास्तस्या अह-

ल्यायाः पादौ जगृहतुः।

गौतमोऽपि तदा तत्रागत्य रामं विधिवत् संपूज्य पूर्ववत्तपस्तेपे।

ततो रामो लक्ष्मणेन सह विश्वामित्रं पुरस्कृत्य उत्तरां दिशं प्रस्थितः।

मिथिलापती राजा जनकस्तु तच्छ्रुत्वा विनयेन सहसा प्रत्युज्जगाम। तेन जनकेन दत्तं पूजार्घं प्रतिगृह्य विश्वामित्रो राज्ञः कुशलं यज्ञस्य च निर्विघ्नतां पप्रच्छ।

तत्सर्वं निवेद्य राजाऽपि कृताञ्जलिर्मुनिं पप्रच्छ। काविमौ वीरपुत्राविति ? विश्वामित्रोऽपि सर्वं पूर्ववृत्तान्तं न्यवेदयत्। ततो जनक उवाच-' धन्योऽनुगृहीतश्चास्मि '।

पाठक इस सरल संस्कृतको पढें। यदि पूर्व पाठ ठीक हो चुके हैं तो यह पाठ विना परिश्रम समझमें आ जायगा। परंतु यदि किसी स्थानपर कुछ कठिनता प्रतीत हुई तो इसी पुस्तकका पाठ ६ देखें, उसमें इसीके वाक्य पदच्छेदपूर्वक दिये हैं। अब निम्न वाक्य पढिये—

कश्चिन्नरो विदुरस्य सुहृत्कुशलः खनको विविक्ते पांडवानिदं वचनमब्रवीत्। अहं कुशलः खनको

विदुरेण प्रहितोऽस्मि । वः पांडवानां किं प्रियं कार्यं करवाणीति ?

विदुरेण विश्वासात्प्रच्छन्नमुक्तः । इह त्वं पांडवानां श्रेयः प्रतिपादयेति । अधुना वः किं करवाणि ? कृष्ण पक्षे अस्यां चतुर्दश्यां रात्रौ पुरोचनस्तव भवनस्य द्वारि हुताशनं प्रदास्यति । पुरुषर्षभाः पांडवा मात्रा सह प्रदग्धव्या इति तस्य दुर्मतेर्धार्तराष्ट्रस्य व्यवस्थितम् ।

हे पाण्डव ! विदुरेण म्लेच्छवाचा किंचिच्च उक्तोऽसि । तत्त्वया च तथेत्युक्तमेतद्विश्वासकारणम् ।

सत्यधृतिः कुंतीपुत्रो युधिष्ठिरस्तमुवाच । हे सौम्य ! त्वां विदुरस्य सुहृदमभिजानामि । तथा शुचिं प्रियं सदा दृढभक्तिकं प्राप्तं त्वामभिजानामि । कवेरविज्ञातं किञ्चित्प्रयोजनं न विद्यते ।

यदि पूर्व पाठ ठीक हुआ है तो यह पाठ पाठकोंकी समझमें आ सकता है । यदि किसी स्थानपर संदेह हुआ तो इसी पुस्तकका पाठ १० देखें ।

यदि पाठक यह पाठ वारंवार पढेंगे तो केवल वारवार पढनेसेही संधिस्थान खोलने और उनका अर्थ जाननेकी विधि पाठकोंके मनमें स्वयं उपस्थित हो सकती है ।

एक एक पाठ बारं बार पढनाही एक अतिसुगम उपाय है।

अब इस पाठमें आये कुछ संधि खोलकर बताते हैं—

१ पुराऽहल्या = पुरा अहल्या।
२ गौतम ऋषिः = गौतमः ऋषिः।
३ तपोऽतप्यत् = तपः अतप्यत्।
४ इंद्रो गौतमस्याश्रममेकदाजगाम = इंद्रः गौतमस्य आश्रमं एकदा आजगाम।
५ तदेन्द्रो विषण्णवदनश्चाभवत् = तदा इन्द्रः विषण्णवदनः च अभवत्।
६ एतद्वनं = एतत् वनं।
७ चाधुना = च अधुना।
८ विश्वामित्रस्यर्षेः = विश्वामित्रस्य ऋषेः।
९ रामलक्ष्मणावपि = रामलक्ष्मणौ अपि।
१० कश्चिन्नरः = कः चित् नरः।
११ प्राहितोऽस्मि = प्राहितः अस्मि।
१२ कवेरविज्ञातं = कवेः अविज्ञातं।

इसी प्रकार अन्यान्य संधियोंके विषयमें पाठक विचार करके तथा पूर्वपाठ देखके समझनेका यत्न करें। ध्यानसे देखनेसे इसमें कोई कठिनता नहीं रहेगी।

पाठ १२

अकारान्त नपुंसकलिंग शब्दोंके रूप निम्नलिखित प्रकार होते हैं—

१ मित्रं–मित्र	४ मित्राय-मित्रके लिये
(हे)मित्र ! =(हे) मित्र	५ मित्रात्–मित्रसे
२ मित्रं–मित्रको	६ मित्रस्य = मित्रका
३ मित्रेण–मित्रसे	७ मित्रे-मित्रमें

केवल प्रथमाका रूप पुल्लिंगसे भिन्न है। अन्य रूप अकारान्त पुल्लिंग शब्दोंके समान ही हैं, यह बात यहां ध्यानमें धरनेयोग्य है। इसी प्रकार निम्नलिखित अकारान्त नपुंसकलिंगी शब्दोंके रूप होते हैं—

पापं—पाप	औषधं—दवा
दर्शनं—दर्शन	तोयं—जल
कार्पण्यं—कंजूसी	कुसुमं—फूल
कार्यं—कर्तव्य	अब्जं—कमल
दुःखं—कष्ट	चक्रं—चाक
व्रतं—व्रत, नियम	रूपं—सुंदरता, स्वरूप
दानं—दान	लावण्यं—सुंदरता
अंतःपुरं-अंदरका कमरा	नेत्रं—आंख
हृदयं—हृदय	सूत्रं—धागा

संस्कृत-वाक्यानि ।

१ पापी मनुष्यः पापात् कथं मुक्तः भवति ? २ तव दर्शनाय अहं अद्य अत्र आगतः। ३ दानसमये कार्पण्यं मा कुरु। ४ रुग्णाय औषधं देहि। ५ तृषिताय तोयं देहि। ६ उद्यानात् कुसुमं स आनयति। ७ जले अब्जं भवति। ८ मनुष्यः दुःखं न वांछति। ९ अहं व्रतं चरिष्यामि। १० सत्यं एव परमं व्रत अस्ति। ११ ज्ञानस्य दानं धनस्य दानात् श्रेष्ठं। १२ गृहस्य मध्ये, अंतःपुरं भवति। १३ अंतःपुरे गृहपत्नी वसति। १४ दुष्टस्य मुखे अमृतं हृदये च विषं भवति। १५ पश्य, रथस्य चक्रं कथं भ्रमति !

भाषा-वाक्य।

१ पापी मनुष्य पापसे कैसे मुक्त होता है ? २ तेरे दर्शन के लिये मैं आज यहां आगया। ३ दानके समय कंजूसी मत कर। ४ रोगीको औषध दो। ५ प्यासेके लिए जल दो। ६ बागसे फूल वह लाता है ७। जलमें कमळ होता है। ८ मनुष्य दुःख नहीं चाहता है। ९ मैं व्रत करूंगा। १० सत्य ही श्रेष्ठ व्रत है। ११ ज्ञानका दान धनके दानसे श्रेष्ठ है। १२ घरके मध्यमें अंतःपुर होता है। १३ अंतःपुरमें घरकी स्वामिनी स्त्री रहती है। १४ दुष्टके मुखमें अमृत और हृदयमें विष होता है। १५ देख रथका चक्र कैसा घूमता है !

*

संस्कृत--वाक्यानि ।

१६ बालकस्य रमणीयं रूपं अहं पश्यामि । १७ सः पुरुषः रूपेण बलेन लावण्येन च अतीव सुंदरः अस्ति । १८ तस्य नेत्रं इदानीं रुग्णं जातम् । १९ तत् श्वेतं सूत्रं अत्र आनय ।

भाषा-वाक्य।

१६ बालकका रमणीय रूप मैं देखता हूं । १७ वह पुरुष रूप, बल और लावण्यसे अत्यंत सुंदर है । १८ उसका नेत्र अब रोगी हुआ । १९ वह सफेद धागा यहां ला ।

संस्कृत--वाक्यानि

कविः सूत्रेण यज्ञोपवीतं करोति । यथा स नेत्रेण रूपं पश्यति तथा कर्णेन शब्दं शृणोति । तस्य स्वरूपं पश्य । यंत्रस्य चक्रं इदानीं न भ्रमति । सः यंत्रस्य चक्रं कदा भ्रामयिष्यति ? हृदयं शुद्धं कुरु । तत्र पापं मा अस्तु । यथा अंतःपुरे पुत्री भ्रमति तथा गृहाद् बहिः पुत्रः भ्रमति । दानेन पुण्यं भवति वा न ? यदि दानेन पुण्यं भवति तर्हि त्वं दानं किं न करोषि ?

पाठक ये वाक्य पढ़ें तथा स्वयं अपने मनसे उक्त शब्दोंके प्रयोग करके वाक्य बनावें । और यदि हो सके तो कई स्थानोंमें संधि भी बनानेका यत्न करें ।

पाठ १३

संस्कृत--वाक्यानि।

१ जनकः उवाच– हे मुनिपुंगव! अत्र अस्ति धनुष्यं शंकरस्य। २ क्षेत्रं कृषतः मे लांगलात् उत्थिता एका सुता च अस्ति। ३ क्षेत्रं शोधयता लब्धा अतः सा सीता इति नाम्ना विश्रुता। ४ सा इदानीं स्वयंवर-योग्या संजाता। ५ वर्धमानां तां सीतां सर्वे राजानः अत्र आगत्य वरयितुं इच्छन्ति। ६ वरयितुं इच्छतां अपि तेषां कन्यां न ददामि वीर्यशुल्का इति। ७ सर्वे नृपतयः वीर्यं जिज्ञासवः अत्र उपागच्छन्।

भाषा--वाक्य।

१ जनक बोला--कि हे मुनि [पुंगव] श्रेष्ठ! यहां है शंकरका धनुष्य। २ खेतकी (कृषतः) कृषि करनेवाले मेरे हलसे उत्पन्न हुई एक पुत्री और है। ३ खेतका शोधन करनेवालेने [लब्धा] प्राप्त की इसलिए वह सीता इस नामसे [विश्रुता] प्रसिद्ध है। ४ वह अब स्वयंवरके लिये योग्य हो गई है। ५ बढनेवाली उस सीताको सब राजा लोग यहां आकर वरना चाहते हैं। ६ वरनेकी इच्छा करनेवाले उन [राजाओं] को भी कन्या मैं नहीं देता हूं। [क्योंकि] यह [वीर्य--शुल्का] वीर्यके बलसे लेनेयोग्य है। ७ सब राजालोग शौर्यकी जिज्ञासा करके यहां आगये।

संस्कृत--वाक्यानि ।

८ तेषां पुरस्तात् मया शैवं धनुः उपाहृतम् । ९ तस्य ग्रहणे तोलने अपि वा ते नृपाः न शेकुः । १० तत् एतत् परमभास्वरं धनुः रामलक्ष्मणयोः च अपि दर्शयिष्यामि । ११ रामः यदि अस्य आरोपणं कुर्यात् अहं सीतां तस्मै दद्याम् । १२ ततः जनकेन समादिष्टाः सचिवाः प्रयासेन धनुं तत्र आनयामासुः । १३ महर्षेः वचनात् तत्र धनुः दृष्ट्वा रामः अब्रवीत् । १४ इदं दिव्यं धनुः पाणिना संस्पृशामि । तस्य तोलने पूरणे अपि यत्नवान् च भविष्यामि ।

भाषा--वाक्य ।

८ उनके सन्मुख मैंने शिवजीका धनुष्य लाया । ९ उसके पकडने और तोलनेमें भी वे राजा नहीं समर्थ हुए । १० वह यह परम तेजस्वी धनुष्य रामलक्ष्मणोंको भी दिखाऊंगा। ११ राम यदि इसको (आरोपणं) डोरी चढायेगा तो मैं सीता उसको दूंगा । १२ तब जनकने आदेश दिये हुए मंत्री प्रयाससे धनुष्यको वहां लाने लगे । १३ महर्षिके वचनसे वह धनुष्य देखकर राम बोला । १४ इस दिव्य धनुषको (पाणिना) हाथसे स्पर्श करता हूं। उनको तोलने और पूर्ण करनेमें भी यत्नवान् होऊंगा ।

पाठ १४ .

संस्कृत--वाक्यानि।

१ एवं उक्त्वा रामः धनुः मध्ये जग्राह। लीलया पूरयामास च। २ यदा रामेण मौर्वी आरोपिता तदा तत् धनुः बभञ्ज च। ३ तदा राजा जनकः प्रांजलिः विश्वामित्रं उवाच। ४ अत्यद्भुतं इदं। अचिन्त्यं अतर्कितं च मया। ५ मे सुता सीता रामं भर्तारं प्राप्य कीर्तिं आहरिष्यति। ६ मे मंत्रिणः शीघ्रं अयोध्यां गच्छन्तु। राजानं दशरथं च अत्र आनयन्तु। ७ एवं समादिष्टाः दूताः त्रिरात्रेण अयोध्यां प्राविशन्। ८ वृद्धं दशरथं राजानं जनकस्य कृते कुशलं च पप्रच्छुः।

भाषा--वाक्य।

१ ऐसा बोलकर रामने धनुष्यको बीचमें पकडा और लीलासे पूरण किया। २ जब रामने (मौर्वी) डोरी चढाई तब वह धनुष (बभञ्ज) टूट गया। ३ तब राजा जनक हाथ जोड विश्वामित्रसे बोला। ४ अति अद्भुत यह है। अचिंत्य और मेरेसे अतर्कित है। ५ मेरी लडकी सीता रामको पति प्राप्त कर कीर्ति कमायेगी। ६ मेरे मंत्री शीघ्र अयोध्याको जांय और राजा दशरथको यहां ले आंय। ७ इस प्रकार आदिष्ट हुए दूत तीन रात्रीके बाद अयोध्यामें प्रविष्ट हुए। ८ वृद्ध दशरथ राजाको जनकके लिये कुशल पूछने लगे।

संस्कृत- वाक्यानि ।

९ तव पुत्रेण रामेण सीता निर्जिता। १० अतः जनकः राजा विवाहमंगलाय भवन्तं सपुरोहितं निमंत्रयति।

भाषा--वाक्य ।

९ तेरे पुत्र रामने सीताको जीत लिया है। १० इसलिए जनक राजा विवाहमंगलके लिये (भवन्तं) आपको पुरोहितोंके साथ निमंत्रण देता है।

पाठक इस पाठको खूब तैयार करें। और अनेक वार पढें।

संधि किए हुए वाक्य।

१ अत्रास्ति धनुष्यं शंकरस्य । शंकरस्य धनुष्यमत्रास्ति । धनुष्यमस्त्यत्र शंकरस्य ।अस्त्यत्र धनुष्यं शंकरस्य ।

२ क्षेत्रं कृषतो मे लांगलादुत्थितैका सुता चास्ति । मे क्षेत्रं कृषतो लांगलादुत्थितैका चास्ति सुता । सुता चास्त्येका लांगलादुत्थिता मे क्षेत्रं कृषतः ।

३ क्षेत्रं शोधयता लब्धाऽतः सा सीतेति नाम्ना विश्रुता। लब्धा क्षेत्रं शोधयताऽतः सीतेति नाम्ना विश्रुता ।

४ सेदानीं स्वयंवरयोग्या संजाता । संजातेदानीं सा स्वयंवरयोग्या। स्वयंवरयोग्या सा संजातेदानीम् ।

पाठ १५

श्लोकोंके पाठोंमें पहिले पद देकर अन्वय दिया जाता था परंतु इस पुस्तकके पूर्वपाठसेही पद देना बंद किया है। पाठकोंको पदके विषयमें संदेह हुआ तो वे अन्वयमें पदोंको देख सकते हैं। पाठक स्वयं अन्वयको देखकर श्लोकके पद लिखनेका अभ्यास करें। इससे उनका अभ्यास बहुतही बढ जायगा।

यथा तस्य तथा नस्त्वं निर्विशेषा वयं त्वयि।
भवतश्च यथा तस्य पालयास्मान्यथा कविः ॥९॥
(म० भारत आदि० १४९)

अन्वयः— यथा तस्य त्वं। तथा नः त्वं। वयं त्वयि निर्विशेषाः। यथा तस्य तथा भवतः। यथा कविः तथा अस्मान् पालय ॥

अर्थ—जैसा उस विदुरके लिये तू है (तथा) वैसा (नः) हमारे लिये तू है। (वयं) हम (त्वयि)तेरे अंदर(निर्विशेषाः) विशेषतारहित हैं [अर्थात् कुछ अन्य भाव नहीं रखते] जैसा उस विदुरके विषयमें वैसे ही (भवतः) आपके विषयमें [हमारे मनमें भाव है] जिस प्रकार (कविः) विदुर उसी प्रकार तुम भी (अस्मान्) हमारी (पालय) रक्षा करो।

इदं शरणमाग्नेयं मदर्थमिति मे मतिः।
पुरोचनेन विहितं धार्तराष्ट्रस्य शासनात् ॥ १० ॥

अन्वयः--इदं आग्नेयं शरणं धार्तराष्ट्रस्य शासनात् पुरोचनेन मदर्थं विहितं इति मे मतिः ॥

अर्थ–यह (आग्नेयं) अग्निसे जलनेयोग्य (शरणं) घर धृतराष्ट्र पुत्रकी (शासनात्) आज्ञासे पुरोचनने (विहितं) मेरे लिये निर्माण किया ऐसा मेरा मत है।

स पापः कोशवांश्चैव ससहायश्च दुर्मतिः ।
अस्मानपि च पापात्मा नित्यकालं प्रबाधते ॥११॥

अन्वयः--स दुर्मतिः पापः कोशवान् च ससहायः एव पापात्मा अस्मान् अपि नित्यकालं प्रबाधते ॥

अर्थ—वह दुष्टबुद्धि पापी (कोश--वान्) खजानेसे युक्त अर्थात् धनवान, (स–सहायः) सहायी जनोंसे युक्त पापात्मा (अस्मान्) हमको (अपि) ही सदा सर्वदा बाधा करता है।

स भवान्मोक्षयत्वस्मान्यत्नेनास्माद्धुताशनात् ।
अस्मास्विह हि दग्धेषु सकामः स्यात्सुयोधनः॥१२

अन्वयः--सः भवान् अस्मात् हुताशनात् यत्नेन अस्मान् मोक्षयतु । हि अस्मासु इह दग्धेषु सुयोधनः सकामः स्यात् ।

अर्थ—वह (भवान्) आप (अस्मात्) इस अग्निसे यत्नके साथ हमको (मोक्षयतु) छुडाइये ॥ क्योंकि यहां (अस्मासु दग्धेषु) हम जल जानेपर (सुयोधनः) दुर्योधन (स–कामः) सफल इच्छावाला हो जायगा ।

इदं तदशुभं नूनं तस्य कर्म चिकीर्षितम् ।
प्रागेव विदुरो वेद तेनास्मानन्वबोधयत् ॥ १४ ॥

अन्वयः-तस्य इदं चिकीर्षितं कर्म नूनं अशुभं। विदुरः प्राक् एव वेद । तेन अस्मान् अन्वबोधयत् ॥

अर्थ-उसका यह (चिकीर्षितं) संकल्पित कर्म (नूनं) निःसंदेह अशुभ है । विदुर (प्राक्) पहिले से ही (वेद) जानता है। (तेन) इस कारण (अस्मान्) हमको (अन्वबोधयत्) सावधान किया।

सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान्पुरा ।
पुरोचनस्याविदितानस्माँस्त्वं प्रतिमोचय ॥ १५ ॥

अन्वयः-सा इयं आपत् अनुप्राप्ता । यां क्षत्ता पुरा दृष्टवान् । त्वं पुरोचनस्य अविदितान् प्रतिमोचय ॥

अर्थ-वह (इयं) यह आपत्ति प्राप्त हुई है। (यां) जिसे (क्षत्ता) विदुरने पहिले (दृष्टवान्) देखा था । तू पुरोचन को (अ-विदितान्) विदित न होते हुए (अस्मान्) हमको (प्रतिमोचय) छुडा ।

स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः ।
परिखामुत्किरन्नाम चकार च महद्बिलम् ॥ १६ ॥

अन्वयः-स खनकः तथा इति प्रतिश्रुत्य यत्नं आस्थितः। परिखां उत्किरन् नाम महत् बिलं चकार च ॥

अर्थ-वह खोदनेवाला (तथा) ठीक ऐसा (प्रतिश्रुत्य) कहकर यत्न करने लगा । (परिखां) खंदक (उत्किरन् नाम) खोदनेके मिषसे बडा बिल करता रहा ।

इन श्लोकोंमें आये संधियोंके पद अब देखिये—

१ नस्त्वं = नः त्वं।

२ भवतश्च = भवतः च।

३ मदर्थमिति = मत् अर्थं इति

४ पालयास्मान् = पालय अस्मान्

५ कोशांश्चैव = कोशान् च एव।

६ मोक्षयत्वस्मान् = मोक्षयतु अस्मान्।

७यत्नेनास्माद्धुताशनात्-यत्नेन अस्मात् हुताशनात्।

८ अस्मास्विह = अस्मासु इह।

९ प्रागेव = प्राक् एव

१० विदुरो वेद = विदुरः वेद।

११ सेयमापदनुप्राप्ता = सा इयं आपद् अनुप्राप्ता।

१२ अस्माँस्त्वं = अस्मान् त्वं।

· ये संधि देखकर संधिके साथ पाठक परिचित हों।

संधि किए हुए वाक्य।

यथा तस्य त्वं तथैवास्माकं त्वमसि। यथा कविरस्मान्पालयति, तथैव त्वमपि पालयास्मान्। इदं लाक्षागृहं धार्तराष्ट्रस्याज्ञया पुरोचनेन निर्मितमिति मम मतिः। स दुर्मतिः पापो दुर्योधनो धनवान् सहायवांश्चास्मान्नित्यं प्रबाधते। अतो भगवान् यत्नेनास्माद्धुताशनादस्मान्मोक्षयतु।

पाठ १६

यदि आपके पूर्व पाठ ठीक हो चुके हैं तो इस पाठमें दिया हुआ सरल संस्कृत आपके ध्यानमें आ जायगा। देखिये-

जनक उवाच—हे मुनिपुंगव! अत्रास्ति धनुर्ष्य शंकरस्य। क्षेत्रं कृषतो मे लाङ्गलादुत्थितैका सुता चास्ति। क्षेत्रं शोधयता लब्धा अतः सा सीतेति नाम्ना विश्रुता। सेदानीं स्वयंवरयोग्या संजाता। वर्धमानां तां सीतां सर्वे राजानोऽत्रागत्य वरयितुमिच्छन्ति।

वरयितुमिच्छतामपि तेषां कन्यां न ददामि वीर्यशुल्केति। सर्वे नृपतयो वीर्यं जिज्ञासवोऽत्रोपागच्छन्। तेषां पुरस्तान्मया शैवं धनुरुपाहृतम्। तस्य ग्रहणे तोलनेऽपि वा ते नृपा न शेकुः। तदेतत्परम भास्वरं धनू राम‌लक्ष्मणयोश्चापि दर्शयिष्यामि।

रामो यद्यस्यारोपणं कुर्यादहं सीतां तस्मै दद्याम्। ततो जनकेन समादिष्टाः सचिवाः प्रयासेन धनुस्तत्रानयामासुः।

महर्षिवचनात्तद्धनुर्दृष्ट्वा रामोऽब्रवीत्। इदं दिव्यं धनुः पाणिना संस्पृशामि तस्य तोलने पूरणेऽपि यत्नवांश्च भविष्यामि।

एवमुक्त्वा रामो धनुर्मध्ये जग्राह। लीलया पूरयामास च। यदा रामेण मौर्वी आरोपिता तदा तद्धनुर्बभञ्ज च।

तदा राजा जनकः प्रांजलिर्विश्वामित्रमुवाच। अत्यद्भुतमिदम्। अचिंत्यमतर्कितश्च मया। मे सुता सीता रामं भर्तारं प्राप्य कीर्तिमाहरिष्यति। मे मंत्रिणः शीघ्रमयोध्यां गच्छन्तु। राजानं दशरथं चात्रानयन्तु।

एवं समादिष्टा दूतास्त्रिरात्रेणायोध्यां प्राविशन्। वृद्धं दशरथं राजानं जनकस्य कृते कुशलं च पप्रच्छुः।

तव पुत्रेण रामेण सीता निर्जिता। अतो जनको राजा विवाहमङ्गलाय भवन्तं सपुरोहितं निमन्त्रयति।

पाठक इसको वार वार पढें। अनेक वार पढनेसेही यह सरल संस्कृत पाठकोंके समझमें आ जायगा।

यदि किसी स्थानपर अर्थके विषयमें अथवा संधिके विषयमें संदेह हुआ तो पाठक पूर्वके तेरहवें पाठमें देखें। वहांके वाक्य देखनेसे सब संदेह निवृत्त हो जांयगे। वहां हरएक वाक्य पदच्छेदपूर्वक दिया हुआ है। और पूर्ण शब्दार्थ भी दिया है। तथापि उसको न देखते हुएही पाठक इस पाठको समझनेका यत्न करें। अब और देखिये—

यथा तस्य त्वं, तथा नस्त्वम्। वयं त्वयि निर्विशेषाः। यथा तस्य तथा भवतः। यथा कविः तथा त्वमस्मान्पालय।

इदमाग्नेयं शरणं धार्तराष्ट्रस्य शासनात्पुरोचनेन विहितमिति मे मतिः।

स दुर्मतिः पापः कोशवांश्च ससहायश्चैव पापात्माऽस्मानपि नित्यकालं प्रबाधते ।

स भवानस्माद्धुताशनाद्यत्नेनास्मान्मोक्षयतु । त्वस्मास्विह दग्धेषु सुयोधनः सकामः स्यात् । तस्येदं चिकीर्षितं कर्म नूनमशुभम् । विदुरः प्रागेव वेद । तेनास्मानन्वबोधयत् ।

सेयमापदनुप्राप्ता । यां क्षत्ता पुरा दृष्टवान् । त्वं पुरोचनस्याविदितानस्मान्प्रतिमोचय ।

स खनकस्तथेति प्रतिश्रुत्य यत्नमास्थितः । परिखामुत्किरन्नाम महद्बिलं चकार च ।

पाठक इसको भी वारंवार पढें । पढनेसे संधि खोलनेकी विधि ज्ञात हो सकती है। यदि किसी स्थानपर संदेह हुआ तो १५ वाँ पाठ देखें वहां इसके मूल श्लोक, अन्वय, अर्थ आदि सब विद्यमान हैं । यदि पूर्व पाठ ठीक हो चुका है तो इसमें कोई कठिनता ही नहीं रहेगी । परंतु किसी कारण संदेह हुआ तो पूर्व पाठ देखनेसे निवृत्त हो सकता है ।

निम्नलिखित प्रश्नोंके उत्तर संस्कृतमें ही दीजिये—

१ कस्य धनुर्ध्यं नत् आसीत् ?

२ सीता कथं प्राप्ता ? केन प्राप्ता ?

३ स्वयंवरसमये सर्वे राजानः किं कुर्वन्ति ?

४ नृपाः तस्य धनुष्यस्य तोलने ग्रहणे वा समर्थाः सन्ति वा न ?

५ ततः रामेण किं कृतम् ?

६ यदा धनुः बभञ्ज तदा जनकेन किं कृतम् ?

७ जनकस्य मन्त्रिणः दशरथं किं ऊचुः ?

८ आग्नेयं शरणं केन विहितम् ?

९ कस्य शासनात् तेन विहितम् ?

१० कः पापात्मा दुर्मतिः ?

११ तेन पापेन किं कृतम् ?

१२ विदुरेण किं कृतम् ?

इन प्रश्नोंका उत्तर संस्कृतमें ही देनेका यत्न कीजिये। यदि उत्तर स्वयं न सूझा तो इसी पाठके पूर्व वाक्य देखकर उत्तर दीजिये। ऐसा करनेसे ही आपकी उन्नति निःसंदेह हो सकती है।

प्रश्नोंके उत्तर ठीक आनेतक आप इस पाठका अभ्यास करते रहिये।

संधि किये हुए वाक्य।

तत्कस्य धनुष्यमासीत्। नृपास्तस्य धनुष्यस्य तोलने ग्रहणे वा समर्थाः सन्ति वा न ? ततो रामेण किं कृतम् ? यदा धनुर्बभञ्ज तदा जनकेन किं कृतम् ? जनकस्य मन्त्रिणो दशरथं किमूचुः ? आग्नेयं शरणं केन विहितम् ? कस्य शासनात्तेन विहितम् ? को दुर्मतिः पापात्मा ?

पाठ १७

संस्कृत-वाक्यानि।

१ ततः दशरथः मिथिलां उपेयिवान् । जनकः च पूजां कल्पयित्वा एनं उवाच । २ दिष्ट्या प्राप्तः असि सह वसिष्ठेन । ददामि सीतां रामाय ऊर्मिलां लक्ष्मणाय च । ३ विश्वामित्रः च उवाच । राजन् ! सदृशः धर्मसंबंधः रामस्य सीतया सह, लक्ष्मणस्य च ऊर्मिलया सह । ४ अन्यत् च । यवीयसः जनकभ्रातुः कुशध्वजस्य अपि सुताद्वयं अस्ति । ५ भरतशत्रुघ्नयोः पत्न्यर्थं सुताद्वयं अपि योग्यम् । ६ वसिष्ठेन अपि तत् अनुमतम् ।

भाषा-वाक्य ।

१ पश्चात् दशरथ मिथिलाके प्रति चला। जनकने पूजा कर उनसे भाषण किया । २ सुदैवसे तू यहां प्राप्त हुआ है वसिष्ठके साथ। देता हूं सीताको रामके लिये और ऊर्मिलाको लक्ष्मणके लिये । ३ विश्वामित्र बोले, हे राजन्! योग्यही धर्मसंबंध है। रामका सीताके साथ लक्ष्मणका उर्मिलाके साथ।४ और यह है कि जनकके (यवीयसः) छोटे भाई कुशध्वजकी भी दो लडकियां हैं। ५ भरत और शत्रुघ्नकी पत्निके लिए वे दोनों लडकियां योग्य हैं । ६ वसिष्ठने भी उसकी अनुमति दी।

संस्कृत-वाक्यानि ।

७ जनकः तु प्राञ्जलिः उवाच । धन्यं मन्ये मम कुलम् । ८ यतः उभौ अपि मुनिपुंगवौ युवां अस्माकं कुलसंबंधं सदृशं ज्ञापयतः । ९ एकेन एव अह्ना चत्वारो राजपुत्राः चतसृणां राजपुत्रीणां पाणीन् गृह्णन्तु । १० ततः सर्वाभरणभूषितां सीतां समानीय, अग्नेः पुरस्तात् संस्थाप्य, राजा रामं अब्रवीत् । ११ मे सुता इयं सीता अद्य तव सहधर्मचारिणी, प्रतीच्छ एनां पतिव्रतां, छायां इव अनुगामिनीम् । १२ ततः सर्वे महर्षयः साधु साधु इति ऊचुः ।

भाषा-वाक्य ।

७ जनक तो हाथ जोडकर बोला, कि धन्य मानता हूं मेरा कुल । ८ क्योंकि (युवां) आप दोनों भी मुनिश्रेष्ठ हमारे कुलसंबंधको योग्य (ज्ञापयतः)कह रहे हैं । ९ एकही दिन चारों राजपुत्र चारों राजपुत्रियोंका (पाणीन्) हाथोंको (गृह्णन्तु) लेवें । पाणिग्रहण करें । १० पश्चात् सर्व भूषणोंसे भूषित सीता को ला, अग्निके सामने (संस्थाप्य) रखकर राजा रामसे बोला । ११ मेरी पुत्री यह सीता आजसे तेरी सहधर्मचारिणी (तेरे साथ धर्माचरण करनेवाली) इच्छा कर इस पतिव्रताकी, यह छायाके समान (अनुगामिनी) पीछेसे आनेवाली है । १२ तब सब महर्षि ' उत्तम है ' ऐसा कहने लगे ।

पाठ १८

संस्कृत-वाक्यानि।

१ लक्ष्मणं भरतं शत्रुघ्नं च तथैव क्रमेण ऊर्मिलया मांडव्या श्रुतकीर्त्या च सह संयोजयामासुः। २ ते अग्निं त्रिः परिक्रम्य भार्याः ऊहुः। ३ अथ रात्र्यां व्यतीतायां विश्वामित्रः, आपृच्छ्य रामचंद्रं, उत्तरपर्वतं जगाम। ४ राजा दशरथः अपि मिथिलाधिपतिं जनकं पृष्ट्वा अयोध्यानगरीं आशु प्रस्थितः। ५ मार्गे तु क्षत्रियविमर्दनं जामदग्न्यं रामं दशरथः ददर्श। ६ तदा दशरथः प्राञ्जलिः भूत्वा 'अभयं देहि' इति तं प्रार्थयामास।

भाषा-वाक्य।

१ लक्ष्मण भरत शत्रुघ्नको उसी क्रमसे ऊर्मिला, मांडवी और श्रुतकीर्तिके साथ संयुक्त किया। २ उन्होंने तीनवार अग्निकी परिक्रमा कर भार्याओंके साथ (ऊहुः) विवाह किया। ३ तब रात्री व्यतीत होनेपर विश्वामित्र पूछकर रामचंद्रको, उत्तर पर्वतको चला। ४ राजा दशरथ भी मिथिलाके अधीश जनकसे पूछ कर अयोध्या नगरीको (आशु) शीघ्रही चला। ५ मार्गमें तो क्षत्रियघातक जमदग्निपुत्र रामको दशरथने देखा। ६ तब दशरथने हाथ जोडकर 'अभय दो' ऐसी उसकी प्रार्थना की।

संस्कृत-वाक्यानि ।

७ अनादृत्य तद् वाक्यं, रामं एव जामदग्न्यः उवाच । पश्य अद्य एव मे पराक्रमम् । ८ रामः अपि धनुः सज्जीकृत्य उवाच । ब्राह्मणः असि त्वम् । तस्मात् ते प्राणं न हरामि । ९ ततः जामदग्न्यः महेन्द्रपर्वतं तपश्चरणं कर्तुं गतः, रामः अपि अयोध्यां प्राप्तः ।

भाषा-वाक्य ।

७ अनादर कर उस वाक्यका, रामकोही जमदग्निपुत्र बोला । देख अब ही मेरा पराक्रम । ८ राम भी धनुष्य सज्य कर बोला, कि ब्राह्मण है तू इसलिये तेरा प्राण नहीं हरण करता । ९ पश्चात् जमदग्निपुत्र महेंद्रपर्वतपर तप करनेके लिए गया और राम भी अयोध्याको प्राप्त हुआ ।

संधि किये हुए वाक्य ।

अनादृत्य तद्वाक्यं राममेव जामदग्न्य उवाच । पश्याद्यैव मे पराक्रमम् । रामोऽपि धनुः सज्जीकृत्योवाच । ब्राह्मणोऽसि त्वम् । तस्मात्ते प्राणं न हरामि । ततो जामदग्न्यो महेन्द्रपर्वतं तपश्चरणं कर्तुं गतः, रामोऽप्ययोध्यां प्राप्तः ।

पाठ १९

चक्रे च वेश्मनस्तस्य मध्ये नातिमहाद्बिलम्।
कपाटयुक्तमज्ञातं समं भूम्याश्च भारत ॥ १७ ॥
(म. भारत आदि. अ. १४९)

अन्वयः—हे भारत ! तस्य वेश्मनः मध्ये न अतिमहत् कपाटयुक्तं अज्ञातं भूम्याः च समं बिलं चक्रे ॥

अर्थ—हे भारत ! उस (वेश्मनः) घरके मध्यमें (न अतिमहत्) अत्यंत बडा नहीं और (कपाट-युक्तं) किवाडोंसे युक्त तथा (अज्ञातं) गुप्त (भूम्याः समं) भूमिके समानही (बिलं) बिल (चक्रे) बना दिया।

पुरोचनभयादेव व्यदधात्संवृतं मुखम्।
स तस्य तु गृहद्वारि वसत्यशुभधीः सदा ॥१८॥

अन्वयः-पुरोचन+भयात् एव संवृतं मुखं व्यदधात् । सः अशुभधीः तस्य गृहद्वारि तु सदा वसति ।

अर्थ—पुरोचनके भयसेही उस बिलका मुख (संवृतं) ढंका हुआ बंद (व्यदधात्) किया। वह (अशुभ-धीः) दुष्ट-बुद्धिवाला उस घरके द्वारमें ही सदा (वसति) रहता था।

तत्र ते सायुधाः सर्वे वसन्ति स्म क्षपां नृप।
दिवा चरन्ति मृगयां पांडवेया वनाद्वनम् ॥ १९ ॥

अन्वयः—हे नृप ! ते सर्वे पांडवेयाः सायुधाः क्षपां तत्र वसन्ति स्म, दिवा वनात् वनं मृगयां चरन्ति ॥

अर्थ—हे राजा ! वे सब पांडुके पुत्र (स-आयुधाः) हथियारोंके समेत (क्षपां) रात्रिके समय वहां (वसन्ति स्म) रहते थे। (दिवा) दिनके समय एक वनसे दूसरे वनको मृगयाके लिये (चरन्ति) घूमते थे।

विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम् ।
अतुष्टास्तुष्टवद्राजन्नूषुः परमविस्मिताः ॥ २० ॥

अन्वयः-हे राजन् पुरोचनं वञ्चयन्तः, अविश्वस्ताः विश्वस्तवत्, अतुष्टाः तुष्टवत्, परम-विस्मिताः ऊषुः ॥

अर्थ—हे राजा ! पुरोचनको (वञ्चयन्तः) ठगाते हुए (अ-विश्वस्ताः) विश्वास न करते हुए भी विश्वास करनेके समान, (अ-तुष्टाः) संतुष्ट न होते हुए भी संतुष्ट होनेके समान, अत्यंत (विस्मिताः) विस्मित होकर (ऊषुः) वसने लगे।

न चैनानन्वबोधन्त नरा नगरवासिनः ।
अन्यत्र विदुरामात्यात्तस्मात्खनकसत्तमात् ॥२१॥

अन्वयः-तस्मात्, खनकसत्तमात् विदुरामात्यात् अन्यत्र नगरवासिनः नराः एनान् न अन्वबोधन्त ॥

अर्थ-उस खोदनेवालोंमें (सत् तम) श्रेष्ठ विदुरके (अमात्य) मंत्रीको छोडकर (अन्यत्र) दूसरे नगरवासी (नराः) जन (एनान्) इनको नहीं (अन्वबोधन्त) जानते थे।

पाठ २०

तांस्तु दृष्ट्वा सुमनसः परिसंवत्सरोषितान् ।
विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः ॥ १ ॥
(म. भारत आदि. अ. १५०)

अन्वयः--परि-संवत्सर--उषितान् सुमनसः तान् दृष्ट्वा, विश्वस्तान् इव संलक्ष्य पुरोचनः हर्षं चक्रे ॥

अर्थ--(संवत्सर) वर्षपर्यंत (उषित) रहे हुए उत्तम मनवाले उन पाण्डवोंको (दृष्ट्वा) देखकर, उनको विश्वास किये समान (संलक्ष्य) अनुभव कर पुरोचन आनंद मानने लगा।

पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः ।
भीमसेनार्जुनौ चोभौ यमौ प्रोवाच धर्मवित् ॥२॥

अन्वयः-तथा पुरोचने हृष्टे अथ कौंतेयः धर्मवित् युधिष्ठिरः भीमसेनार्जुनौ उभौ यमौ च प्रोवाच ॥

अर्थ--उस प्रकार पुरोचन संतुष्ट होनेपर (अथ) नंतर (कौन्तेयः) कुन्तीपुत्र धर्मज्ञानी युधिष्ठिर भीम अर्जुन और (उभौ) दोनों (यमौ) जुडे भाई नकुल सहदेवको (प्रोवाच=प्र उवाच) बोला।

इस पाठके श्लोकोंमें आये संधिका विग्रह-

१ वेश्मनस्तस्य = वेश्मनः तस्य ।
२ नातिमहद्बिलम् = न अति महत् बिलम् ।
३ भूम्याश्च = भूम्याः च ।
४ भयादेव = भयात् एव ।

५ वसत्यशुभधीः = वसति-अशुभ-धीः।
६ सायुधाः = स-आयुधाः।
७ वनाद्वनं = वनात्-वनम्।
८ विश्वस्तवदविश्वस्ताः = विश्वस्तवत् अविश्वस्ता।
९ अतुष्टास्तुष्टवद्राजन्नूषुः= अतुष्टाःतुष्टवत् राजन् ऊषुः
१० चैनानन्वबोधन्त = च एनान् अनु-अबोधन्त।
११ तांस्तु = तान् तु।
१२ कौन्तेयोऽथ = कौन्तेयः अथ।
१३ भीमसेनार्जुनौ = भीमसेन-अर्जुनौ।
१४ चोभौ = च उभौ।
१५ प्रोवाच = प्र-उवाच।

पाठक ये संधि देखें और संधि पहचाननेका यत्न करें।

समासाः।

पूर्व श्लोकोंमें आये समासोंका विवरण-

१ भीमसेनार्जुनौ = भीमसेनः च अर्जुनः च भीमसेनार्जुनौ (भीम और अर्जुन।)
२ धर्मवित् = धर्मं वेत्ति धर्मवित् (धर्म जाननेवाला)
३ नगरवासिनः-नगरे वसन्ति इति नगरवासिनः। (नगरमें वसनेवाले)
४ स्वनकसत्तमः = स्वनकेषु सत्तमः (खोदनेवालोंमें उत्तम।)

पाठ २१

संस्कृत—वाचन—पाठः ।

ततो दशरथो मिथिलामुपेयिवान् । जनकश्च पूजां कल्पयित्वैनमुवाच । दिष्ट्या प्राप्तोऽसि सह वसिष्ठेन । ददामि सीतां रामायोर्मिलां लक्ष्मणाय च ।

विश्वामित्रश्चोवाच । राजन् ! सदृशो धर्मसम्बन्धो रामस्य सीतया सह, लक्ष्मणस्य चोर्मिलया सह । अन्यच्च यवीयसो जनकभ्रातुः कुशध्वजस्यापि सुताद्वयमस्ति । भरतशत्रुघ्नयोः पत्न्यर्थं सुताद्वयमपि योग्यम् । वसिष्ठेनापि तदनुमतम् ।

जनकस्तु प्राञ्जलिरुवाच-"धन्यं मन्ये मम कुलम् । यत उभावपि मुनिपुंगवौ युवामस्माकं कुलसंबन्धं सदृशं ज्ञापयतः ।

एकेनैवाह्ना चत्वारो राजपुत्राश्चतसृणां राजपुत्रीणां पाणीन् गृह्णन्तु" ततः सर्वाभरण भूषितां सीतां समानीयाग्नेः पुरस्तात्संस्थाप्य राजा राममब्रवीत् "मे सुतेयं सीताद्य तव सहधर्मचारिणी, प्रतीच्छैनां पतिव्रतां, छायामिवानुगामिनीम् ।" ततःस र्वे महर्षयः साधुसाध्वित्यूचुः ।

लक्ष्मण भरतं शत्रुघ्नं च तथैव क्रमेणोर्मिलया माण्डव्या श्रुतकीर्त्या च सह संयोजयामासुः। तेऽग्निं त्रिः-

परिक्रम्य भार्या ऊहुः।

अथ रात्र्यां व्यतीतायां विश्वामित्र आपृष्ट्वा रामचन्द्रमुत्तरपर्वतं जगाम।

राजा दशरथोऽपि मिथिलाधिपतिं जनकं पृष्ट्वाऽयोध्यानगरीमाशु प्रस्थितः। मार्गे तु क्षत्रियविमर्दनं जामदग्न्यं रामं दशरथो ददर्श। तदा दशरथः प्राञ्जलिर्भूत्वा "अभयं देहीति" तं प्रार्थयामास।

अनादृत्य तद्वाक्यं, राममेव जामदग्न्य उवाच 'पश्याद्य मे पराक्रमम्।' रामोऽपि धनुः सज्जीकृत्योवाच- "ब्राह्मणोऽसि त्वं; तस्मात्ते प्राणं न हरामि।" ततो जामदग्न्यो महेन्द्रपर्वतं तपश्चरणं कर्तुं गतो, रामोऽप्ययोध्यां प्राप्तः।

हे भारत! स तस्य वेश्मनो मध्ये नातिमहत्कपाटयुक्तमज्ञातं भूम्याश्च समं बिलं चक्रे। पुरोचनभयादेव संवृतं मुखं व्यदधात्। स पुरोचनोऽशुभधीस्तस्य गृहद्वारि तु सदा तिष्ठति।

हे नृप! ते सर्वे पाण्डवेयाः सायुधाः क्षपां तत्र वसन्ति स्म, दिवा च वनाद्वनं मृगयां चरन्ति। हे राजन्! पुरोचनं वञ्चयन्तोऽविश्वस्ता विश्वस्तवत्, अतुष्टास्तुष्टवत, परमविस्मिता ऊषुः। तस्मात्खनकसत्तमाद्विदुरामात्यादन्यत्र नगरवासिनो नरा एनान्नावबोधन्त।

पाठ २२

परिसंवत्सरोपितान्सुमनसस्नान्दृष्ट्वा, विश्वस्तानि-च संलक्ष्य, पुरोचनो हर्षं चक्रे। तथा पुरोचने हृष्टे, अथ धर्मविद्युधिष्ठिरो भीमार्जुनौ यमौ च प्रोवाच।

श्रेष्ठ उत्तमो मनुष्यो यद्यदाचरति तत्तदेवेतरो जन आचरति। यद्यदेव नृप आचरति तत्तदेव प्रजा-जन आचरति। यथा विद्वानाचरति तथैव साधारणो जन आचरति। यथा त्वमाचरसि तथैवाहमाचरामि। यथाऽहमाचरामि तथा त्वं नाचरसि।

स श्रेष्ठ उत्तमः पुरुषो यद्यत्प्रमाणं कुरुते तत्तदेव लोक अनुवर्तते। यद्यद्भूपतिः प्रमाणं कुरुते तत्तदेव प्रजाजनः अनुवर्तते। यद्यद्भूपतिः प्रमाणं कुरुते साधा-रणो जनस्तत्तदेवानुवर्तते।

आत्मनाऽऽत्मानमुद्धरेत्। सदात्मानमेवात्मनोद्धरेत्। कदाऽप्यात्मनाऽऽत्मानं नावसादयेत्। मनुष्येण सदा तथा प्रयत्नः कर्तव्यो येन तस्योद्धारो भविष्यति।

आत्मैवात्मनो बंधुर्भवति, तथाऽऽत्मनः शत्रुरप्या-त्मैव भवति। यः स्वकर्तव्यं करोति स एवात्मनो बन्धुर्भवति, तथा यः स्वकर्तव्यं न करोति, स एवा-त्मनः शत्रुर्भवति।

हे मनुष्य! मनो दुर्निग्रहं चलं चास्तीत्यसंशयं सत्यमेवास्ति। परंतु तस्य निग्रहोऽभ्यासेन वैराग्येण

च भवति नान्येन केनापि कर्मणा भवति ।

यो वीर इदानीं युद्धेऽवस्थितः स विजयं प्राप्स्यति। यो वीरः पुरुषो युद्धं करोति सोऽवश्यं विजयं प्राप्नोति।

तस्मात्त्वमुत्तिष्ठ । हे वीर ! इदानीं त्वं युद्धायोत्तिष्ठ, यशश्च लभस्व । शत्रूञ्जित्वा समृद्धं राज्यं भुंक्ष्व।

एते वीरा मयैव पूर्वं निहताः । अतस्त्वं निमित्तमात्रं भव। क्षत्रस्य धर्मस्य तत्त्वं 'धर्म्यं युद्धं कर्तव्य'मित्येवास्ति। अतो धर्म्याद्युद्धात्पलायनं क्षत्रियाय न योग्यं भवति ।

तस्य क्षत्रियस्य किं नगरमस्ति ? स वीरः क्षत्रियो वीरपुरे निवसति । तस्मान्नगरात्स इदानीमेवात्रागतः। स किमर्थमत्रागतः ? स कदाऽस्मान्नगरात्स्वनगरं गमिष्यतीति त्वं जानासि किम् ?

आदौ वीरेणेन्द्रियाणि संयम्य शत्रुणा सहावश्यं युद्धं कर्तव्यम्। यो वीरो निर्मलो निश्चलो निर्विकारो नित्यपूतो निस्पृहो निर्मोहः स एव प्रशंसनीयः। स एव युद्धे विजयं प्राप्नोति ।

पापी मनुष्यः पापात्कथं मुक्तो भवति ? तव दर्शनायाहमत्रागतः । दानसमये कार्पण्यं मा कुरु। रुग्णायौषधं देहि। तृषिताय तोयं देहि ।

पाठ २३

संस्कृत-वाचन-पाठः ।

(१)

उद्यानात्कुसुमं स आनयति । जलेऽब्जं भवति । मनुष्यो दुःखं न वाञ्छति । अहं व्रतं चरिष्यामि । सत्यमेव परमं व्रतमस्ति। ज्ञानस्य दानं धनस्य दानाच्छ्रेष्ठम् । गृहस्य मध्येऽन्तःपुरं भवति । अन्तःपुरे गृहपत्नी वसति । दुष्टस्य मुखेऽमृतं हृदये च विषं भवति । पश्य रथस्य चक्रं कथं भ्रमति ?

बालकस्य रमणीयं रूपमहं पश्यामि । स पुरुषो रूपेण बलेन लावण्येन चातीव सुन्दरोऽस्ति । तस्य नेत्रमिदानीं रुग्णं जातम् । तच्छ्वेतं सूत्रमत्रानय । कविः सूत्रेण यज्ञोपवीतं करोति । यथा स नेत्रेण रूपं पश्यति, तथा कर्णेन शब्दं शृणोति । तस्य रूपं पश्य । यन्त्रस्य चक्रमिदानीं न भ्रमति । स यन्त्रस्य चक्रं कदा भ्रामयिष्यति ? हृदयं शुद्धं कुरु । तत्र पात्रं माऽस्तु । यथाऽन्तःपुरे पुत्री भ्रमति, तथा गृहाद्बहिः पुत्रो भ्रमति । दानेन पुण्यं भवति वा न ? यदि दानेन पुण्यं भवति, तर्हि त्वं दानं किं न करोषि ।

(२)

युद्धं स्वर्गस्यैव द्वारमस्ति । यः क्षत्रियो धर्म्यं युद्धं करोति स तेनैव द्वारेण स्वर्गं गच्छति । यदि स युद्धे

मृतो भवति तर्हि स स्वर्गं गच्छति, यदि न मृतो विजयं प्राप्तस्तर्हि राज्यं प्राप्नोति ।

अतः क्षत्रिय ईदृशं युद्धं सुखेन करोति । तेन स्वर्गं भूमिराज्यं वा प्राप्नोति । परंतु यो भीरुः पुरुषो युद्धं कर्तुं न समर्थः स न स्वर्गं प्राप्नोति । नाप्यत्र भूमि-राज्यं प्राप्नोति ।

यः क्षत्रियो धर्मेण राज्यं रक्षति, राज्यस्य रक्ष-णार्थं चावश्यकं युद्धं करोति, स एव क्षत्रियो यशस्वी कीर्तियुक्तश्च भवति, नान्यः ।

उदधेर्जलं स्नानाय योग्यं भवति । उदधेर्जलस्य स्नानेन शरीरस्यारोग्यं भवति । तेन स्नानेन शरीर-स्य रोगोऽपि दूरं गच्छति ।

एको रथो भूमिमार्गेण गच्छति, स रथ इत्युच्यते। अन्यो रथो जलमार्गेण गच्छति, स जलरथ इत्यु-च्यते । तृतीयो रथ आकाशमार्गेण गच्छति, स विमान इत्युच्यते ।

भूपतिः प्रजापालनेन यश इच्छति । ब्राह्मणो ज्ञान वर्धनेन श्रेयो वाञ्छति । वैश्यो धनवर्धनेनैश्वर्यं कांक्ष-ति । शूद्रः कर्मणोत्कर्षं प्राप्नोति । सर्वोऽपि जनः स्वकर्मणैव यशस्वी भवति । न तूद्योगं त्यक्त्वा सिद्धिं कोऽपि प्राप्नोति ।

पाठ २४

ईश्वरो हृदयदेशे तिष्ठति । तं यदि त्वं शरणं गच्छसि, तर्हि स एव त्वां स्वर्गं नेष्यति ।

यदि दिनसमये भानोः प्रकाशो भवति, तर्हि रात्रिसमये सोमस्य प्रकाशो भवति । सूर्यस्योष्णः प्रकाशस्तथा सोमस्य शीतः प्रकाशोऽस्ति ।

यः स्वधर्मं पालयति स एवोत्कर्षं प्राप्नोति, नान्यः। तस्यैव सर्वत्र कीर्तिर्भवति नान्यस्य । स एवोत्तमं यशः प्राप्नोति, नान्यः ।

अहं लोकस्य क्षयकृत्कालोऽस्मि । लोकान्समाहर्तुमिहास्मिन्युद्धे प्रवृत्तोऽस्मि । अस्मिन्युद्धे सर्वस्य लोकस्य क्षयं कर्तुमिच्छामि । ये वीरा अस्मिन्युद्धेऽत्रावस्थितास्ते सर्वेऽपि त्वामृतेऽपि न भविष्यन्त्येव ।

यो वीर इदानीं युद्धेऽवस्थितः स विजयं प्राप्स्यति । यो धीरःपुरुषो युद्धं करोति सोऽवश्यं विजयं प्राप्नोति ।

तस्मात्त्वमुत्तिष्ठ । यशो लभस्व । हे वीर ! इदानीं त्वं युद्धायोत्तिष्ठ, यशश्च लभस्व । शत्रूञ्जित्वा समृद्धं राज्यं भुंक्ष्व ।

एते वीरा मयैव पूर्वं निहताः, अतस्त्वं निमित्तमात्रं भव ।

सा ताटिका राक्षसी रजोमेघेन रामं मुहूर्तं व्यमोहयत्। परन्तु पश्चाद्रामस्तां राक्षसीं त्राटिकां विव्याधोरसि शरेण। तेन बाणेनोरसि विद्धा सा राक्षसी पपात ममार च।

ततस्त्राटिकावधेन संतुष्टो मुनिवरो विश्वामित्रो राममुवाच। हे रामचन्द्र! सर्वथाऽहं संतुष्टोऽस्मि तेऽनेन शौर्येण। अतः प्रीत्याऽहं ते सर्वाण्यस्त्राणि प्रयच्छामि। तैरस्त्रैः समन्वितो युद्धे त्वं शत्रूञ्जेष्यसि। इत्युक्त्वा विश्वामित्रः सर्वाण्यस्त्राणि यथाशास्त्रं रामाय न्यवेदयत्। ततः स विश्वामित्रो रामं लक्ष्मणं च गृहीत्वा स्वकीयं सिद्धाश्रमं प्राविशत्।

तत्र मुहूर्तं विश्रान्तौ रामलक्ष्मणौ 'मुनिश्रेष्ठो यज्ञदीक्षां प्रविशतु' इति तमनुबबन्धतुः। तच्छ्रुत्वा सर्वेऽपि मुनयो रामलक्ष्मणं प्रशशंसुः।

" अद्य प्रभृति षड्रात्रं रक्षतां युवां " इति चोचुः। तावपि यत्तौ षडहोरात्रं तपोवनमरक्षताम्।

षष्ठ्यां रात्रौ मायां कुर्वाणौ राक्षसावभ्यधावताम्। परमक्रुद्धो रामो मारीचस्य राक्षसस्योरसि मानवमस्त्रं चिक्षेप।

तेनास्त्रेण मारीचः सागरे क्षिप्तः। मारीचं सागरे क्षिप्तं दृष्ट्वा सुबाहोरुरस्याग्नेयास्त्रं रामो वेगेन चिक्षेप।